# .. shrIdashamahAvidyAkavacham ..

# ॥ શ્રીદશમહાવિદ્યાકવચમ્ ॥

## Document Information

Text title : dashamahAvidyAkavacham

File name : dashamahAvidyAkavacham.itx

Category : kavacha

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : KS Ramachandran ramachandran_ksr@yahoo.ca, PSA Easwaran

Description/comments : http://mysiddhashram.blogspot.com/2011/10/ten-mahavidya-kavach.html

Latest update : May 2, 2015

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીદશમહાવિદ્યાકવચમ્ ॥

વિનિયોગઃ

ૐ અસ્ય શ્રીમહાવિદ્યાકવચસ્ય શ્રીસદાશિવ ઋષિઃ ઉષ્ણિક્ છન્દઃ
શ્રીમહાવિદ્યા દેવતા સર્વસિદ્ધીપ્રાપ્ત્યર્થે પાઠે વિનિયોગઃ ।

ઋષ્યાદિ ન્યાસઃ

શ્રીસદાશિવઋષયે નમઃ શિરસી ઉષ્ણિક્ છન્દસે નમઃ મુખે
શ્રીમહાવિદ્યાદેવતાયૈ નમઃ હૃદિ સર્વસિદ્ધિપ્રાપ્ત્યર્થે
પાઠે વિનિયોગાય નમઃ સર્વાઙ્ગે ।

માનસપુજનમ્

ૐ પૃથ્વીતત્ત્વાત્મકં ગન્ધં શ્રીમહાવિદ્યાપ્રીત્યર્થે સમર્પયામિ નમઃ ।
ૐ હં આકાશતત્ત્વાત્મકં પુષ્પં શ્રીમહાવિદ્યાપ્રીત્યર્થે સમર્પયામિ નમઃ ।
ૐ યં વાયુતત્ત્વાત્મકં ધૂપં શ્રીમહાવિદ્યાપ્રીત્યર્થે આઘ્રાપયામિ નમઃ ।
ૐ રં અગ્નિતત્ત્વાત્મકં દીપં શ્રીમહાવિદ્યાપ્રીત્યર્થે દર્શયામિ નમઃ ।
ૐ વં જલતત્ત્વાત્મકં નૈવેદ્યં શ્રીમહાવિદ્યાપ્રીત્યર્થે નિવેદયામિ નમઃ ।
ૐ સં સર્વતત્ત્વાત્મકં તામ્બૂલં શ્રીમહાવિદ્યાપ્રીત્યર્થે નિવેદયામિ નમઃ।

અથ શ્રીમહાવિદ્યાકવચમ્

ૐ પ્રાચ્યાં રક્ષતુ મે તારા કામરૂપનિવાસિની ।
આગ્નેય્યાં ષોડશી પાતુ યામ્યાં ધૂમાવતી સ્વયમ્ ॥ ૧॥

નૈરૃત્યાં ભૈરવી પાતુ વારુણ્યાં ભુવનેશ્વરી ।
વાયવ્યાં સતતં પાતુ છિન્નમસ્તા મહેશ્વરી ॥ ૨॥

કૌબેર્યાં પાતુ મે દેવી શ્રીવિદ્યા બગલામુખી ।
ઐશાન્યાં પાતુ મે નિત્યં મહાત્રિપુરસુન્દરી ॥ ૩ ॥

ઊર્ધ્વં રક્ષતુ મે વિદ્યા માતઙ્ગીપીઠવાસિની ।
સર્વતઃ પાતુ મે નિત્યં કામાખ્યા કાલિકા સ્વયમ્ ॥ ૪॥

બ્રહ્મરૂપા મહાવિદ્યા સર્વવિદ્યામયી સ્વયમ્ ।
શીર્ષે રક્ષતુ મે દુર્ગા ભાલં શ્રીભવગેહિની ॥ ૫॥

ત્રિપુરા ભ્રુયુગે પાતુ શર્વાણી પાતુ નાસિકામ્ ।
ચક્ષુષી ચણ્ડિકા પાતુ શ્રોત્રે નિલસરસ્વતી ॥ ૬॥

મુખં સૌમ્યમુખી પાતુ ગ્રીવાં રક્ષતુ પાર્વતી ।
જિહ્વાં રક્ષતુ મે દેવી જિહ્વાલલનભીષણા ॥ ૭॥

વાગ્દેવી વદનં પાતુ વક્ષઃ પાતુ મહેશ્વરી ।
બાહૂ મહાભુજા પાતુ કરાઙ્ગુલીઃ સુરેશ્વરી ॥ ૮॥

પૃષ્ઠતઃ પાતુ ભીમાસ્યા કટ્યાં દેવી દિગમ્બરી ।
ઉદરં પાતુ મે નિત્યં મહાવિદ્યા મહોદરી ॥ ૯॥

ઉગ્રતારા મહાદેવી જઙ્ઘોરૂ પરિરક્ષતુ । ?? ઉગ્રાતારા
ગુદં મુષ્કં ચ મેઢ્રં ચ નાભિં ચ સુરસુન્દરી ॥ ૧૦॥

પાદાઙ્ગુલીઃ સદા પાતુ ભવાની ત્રિદશેશ્વરી ।
રક્તમાંસાસ્થિમજ્જાદીન્ પાતુ દેવી શવાસના ॥ ૧૧॥

મહાભયેષુ ઘોરેષુ મહાભયનિવારિણી ।
પાતુ દેવી મહામાયા કામાખ્યાપીઠવાસિની ॥ ૧૨॥

ભસ્માચલગતા દિવ્યસિંહાસનકૃતાશ્રયા ।
પાતુ શ્રીકાલિકાદેવી સર્વોત્પાતેષુ સર્વદા ॥ ૧૩॥

રક્ષાહીનં તુ યત્સ્થાનં કવચેનાપિ વર્જિતમ્ ।
તત્સર્વં સર્વદા પાતુ સર્વરક્ષણકારિણી ॥ ૧૪॥

http://mysiddhashram.blogspot.com/2011/10/ten-mahavidya-kavachtml
Proofread by KS Ramachandran ramachandran underscore ksr at yahoo.ca
and Psa Easwaran psaeaswaran at gmail.com

.. shrIdashamahAvidyAkavacham ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*